# गतानुगतिको लोकः

रामपूरं नाम एकं नगरं आसीत् । तत्र एकः भिक्षुकः आसीत् । सः प्रतिदिनम् प्रातःकाले भिक्षार्थम् गच्छति स्म । भिक्षायां काचित् महिला वस्त्राणि ददाति, काचित् अन्नम् ददाति, कुत्रचित् धनमपि प्राप्नोति सः । प्राप्तम् सर्वम् धनम् सः गृहम् गत्वा एकस्मिन् घटे स्थापयति स्म । एकस्मिन् दिने घटः धनेन पूर्णः भवति । भिक्षुकः चिन्तयति एतावता धनेन अहम् काशीं गन्तुं शक्नोमि । काशी विश्वेश्वरस्य दर्शनं करोमि । गङ्गास्नानं करोमि । एवं सः घटं स्वीकृत्य काशीं गच्छति । स्नानार्थं गङ्गातीरं गच्छति । तत्र सः वालुकायां एकं गर्तं करोति । घटं अन्तः स्थापयति । उपरि चिह्नं इति एकं शिवलिङ्गम् करोति । अनन्तरं स्नानार्थं गच्छति । तदा तत्र इतोपि एकः यात्रिकः आगच्छति । सः शिवलिङ्गं दृष्ट्वा चिन्तयति यत् काश्यां एषा परम्परा । प्रथमं शिवलिङ्गं करणीयं अनन्तरं स्नानं करणीयम् । अतः सः अपि वालुकायाः एकं शिवलिङ्गं करोति, स्नानार्थं गच्छति । अनन्तरं तत्र इतोपि जनाः आगच्छन्ति, ते अपि तथैव चिन्तयन्ति । एकैकं शिवलिङ्गं कुर्वन्ति, स्नानार्थं च गच्छन्ति । भिक्षुकः यदा स्नानं समाप्य आगच्छति, तदा पश्यति, तत्र बहूनि शिवलिङ्गानि सन्ति । स्वकीयं शिवलिङ्गं ज्ञातुं असमर्थः सः बहुदुःखितः भवति । दुःखेन एवं सः एकं श्लोकं भजति ।

“गतानुगतिको लोकः न लोकः पारमार्थिकः ।
गङ्गासैकतलिङ्गेन नष्टं मे ताम्रभाजनम्”।।